इदं पुस्तकं भावनगरस्थ
लल्लुभाई–तनूज–गुलाबचन्द्रेण
स्वकीय "आनन्द प्रीन्टींग प्रेस"
नाम्नि मुद्रणालये मुद्रितम्।



भावनगरीय– श्री जैन
आत्मानन्दसभाकार्याधिकारिणा
गांधी त्रिभुवनदासात्मजेन
वल्लभदासेन प्रकाशितम्।

॥ न्यायांभोनिधि–श्रीमद्विजयानन्दसूरिः ॥



जन्म १८९३ स्वर्ग १९५३.

આનંદ પ્રીન્ટીંગ પ્રેસ—ભાવનગર

अथ निवेदनम् ।



इदं हि चन्द्रसूर्यादिमण्डलगतानेकवक्तव्यताप्रधानं सान्वर्था-भिधेयाभिधानं नवनवतिगाथापरिमितं मण्डलप्रकरणं नाम प्रकरणं सांप्रतकालीनमन्दमतीनामेकत्र मण्डलविचारसारजिज्ञासूनां भव्यसत्त्वानां तत्त्वबोधाय स्वस्मृतये च जीवाजीवाभिगमादिसूत्रगाथाभिः बृहद्-गच्छगगनाङ्गणदिनमणिश्रीमन्मुनिचन्द्रसूरिविरचितप्रथममण्डलविचार-कुलकगाथाभिः पृथक्पृथगागमप्रकीर्णकगतविप्रकीर्णसूक्ष्ममण्डलविचारले-शाधारविरचितनवीनगाथाभिश्च श्रीमता पण्डितविनयकुशलेन सङ्कलि-तमित्यस्य प्रकरणस्य प्रान्तगाथाव्याख्यानतः प्रकटमेव ।

अस्य प्रकरणस्योपरि वाचकवर्गस्य सुखावबोधाय जिनागम-उ-पाङ्ग-प्रकरणादिगतमण्डलविचारानुसरणशीलाऽतीवस्फुटतरव्याख्याना अनेनैव पण्डितप्रवरेण स्वोपज्ञा वृत्तिरपि लिखितेत्यस्य प्रशस्तिगतद्वि-तीयकाव्येन स्फुटमेवावसीयते ।

स्वोपज्ञवृत्तियुतस्यास्य प्रकरणस्य विनिर्मातारः कदा कतमं महीमण्डलं मण्डयामासुः? इति जिज्ञासाया जातायां प्रस्तुतप्रकरणस्य प्रशस्तिगतेन—

"गुरवस्तपगणपुष्करसूर्याः श्रीविजयसेनसूरीन्द्राः ।
श्रीमदकब्बरनरवरविहितप्रवरप्रमोदा ये ॥ १ ॥
तेषां शिशुना वृत्तिः स्वोपज्ञा व्यरचि विनयकुशलेन ।
मूलत्राणादपुरे करबाणरसेन्दु १६५२ मितवर्षे ॥ २ ॥"

अथ निवेदनम् ।



इदं हि चन्द्रसूर्यादिमण्डलगतानेकवक्तव्यताप्रधानं सान्वर्थाभिधेयाभिधानं नवनवतिगाथापरिमितं मण्डलप्रकरणं नाम प्रकरणमाधुनिककालीनमन्दमतीनामेकत्र मण्डलविचारसारजिज्ञासूनां भव्यसत्त्वानां तदवबोधाय स्वस्मृतये च जीवाजीवाभिगमादिसूत्रगाथाभिः बृहद्गच्छगगनाङ्गणदिनमणिश्रीमन्मुनिचन्द्रसूरिविरचितमण्डलविचारकुलकगाथाभिः पृथक्पृथगागमप्रकीर्णकगतविप्रकीर्णभूतमण्डलविचारश्लेषाधारविरचितनवीनगाथाभिश्च श्रीमता पण्डितविनयकुशलेन सङ्कलितमित्यस्य प्रकरणस्य प्रान्तगाथाव्याख्यानतः प्रकटमेव ।

अस्य प्रकरणस्योपरि वाचकवर्गस्य सुखावबोधाय जिनागम–उपाङ्ग–प्रकरणादिगतमण्डलविचारानुसरणशीलाऽतीवस्फुटतरव्याख्याना अनेनैव पण्डितप्रवरेण स्वोपज्ञा वृत्तिरपि लिखितेत्यस्य प्रशस्तिगतद्वितीयकाव्येन स्फुटमेवावसीयते ।

स्वोपज्ञवृत्तियुतस्यास्य प्रकरणस्य विनिर्माता कदा कतमं महीमण्डलं मण्डयामास ? इति जिज्ञासायां जातायां प्रस्तुतप्रकरणस्य प्रशस्तिगतेन—

> " गुरुतपगणपुष्करसूर्याः श्रीविजयसेनसूरीन्द्राः ।
> श्रीमदकब्बरनरवरविहितप्रभूतप्रमोदा ये ॥ १ ॥
>
> तेषां शिशुना वृत्तिः स्वोपज्ञा व्यरचि विनयकुशलेन ।
> मूलत्राणाख्यपुरे काणाणरसेन्दु १६९२ मितवर्षे ॥ २ ॥"

इत्यनेन काव्यद्वयेन तथा

तिकाप्रकरणवृत्तिगतेन—

"श्रीतपगणगगनाङ्गणसूरश्रीविजयदेवसूरीणाम् ।
विनियोगाद् वृत्तिरियं विनिर्मिता विनयकुशलेन ॥ १ ॥"

इत्येतत्काव्येन च श्रीमद्विजयसेनसूरिश्रीविजयदेवसूर्योः समान-कालवर्तित्वेन विक्रमार्कीयद्विपञ्चाशदधिकषोडशशताब्द्यां रणवृत्तिविरचितत्वेन च श्रीमतो विनयकुशलस्य सत्तासमयोऽपि निर्विवादं विक्रमीयसप्तदशशताब्द्यामेव निश्चीयते ।

अनन्तरोक्तग्रन्थव्यतिरिक्तो ज्योतिश्चक्रविचारनामा ग्रन्थः श्रीमता विनयकुशलेन कृतोऽस्तीति श्रूयते परं न समासादि ।

अस्य प्रकरणस्य मुद्रणे द्रव्यसाहाय्यं भावनगरवास्तव्यश्रीमालिज्ञातीय–श्रेष्ठि–माणिक्यचन्द्र–तनूज–उजमसी इति नाम्ना कृतम् । तदस्यैतत्कार्यं प्रशंसार्हम् ।

एतस्य संशोधनसमये प्रवर्तकश्रीमत्कान्तिविजयपुस्तकसंग्रहान्नव्ये अनतिशुद्धे पुस्तके समुपलब्धे ।

यद्यप्यनन्तरोदितपुस्तकद्वितयाधारेण सावधानतया संशोधनमकारि तथाप्यत्र दृष्टिदोषेण क्वचनाशुद्धिरवशिष्टा भवेत्तत्र संशोध्य वाचनीयं धीधनैरिति प्रार्थ्यते—

सचरणाब्जचञ्चरीकः

चतुरविजयः ।

॥ अर्हम् ॥

[illegible]

श्रीमद्-विनयकुशलविरचितस्वोपज्ञवृत्तिसङ्कलितं

मण्डलप्रकरणम् ।

—•※•—

श्रीमद्वीरजिनं नत्वा, निम्नागिस्थार्थदेशकम् ।
मण्डलादिविचारस्य, कुर्वे वृत्तिं सुबोधिकाम् ॥ १ ॥

अन्यत्र ग्रन्थेषु विस्तराभिहितान् चन्द्रादिमण्डलादिविचारान् कैःयात्र संक्षेपेण सद्विचारान् विधित्सया मण्डलप्रकरणाभिधानस्य ग्रन्थस्ये-मामाद्यां गाथामाह -

पणमिय वीरजिणिंदं, भवमंडलभमणदुक्खपरिमुक्कं ।
चंदाइमंडलाई-वियारलवमुद्धरिस्सामि ॥ १ ॥

पणमि० । श्रीवीरजिनेन्द्रं 'प्रणम्य' नत्वा, किंलक्षणं वीरम् ? भवमण्डलभ्रमणस्य यद् दुःखं तेन परिमुक्तं-रहितं, चन्द्रादिमण्डलादिवि-चारलेशमुद्धरिष्यामि, जीवाभिगमादागमादिति शेषः । इह चन्द्रादयः पञ्च-चन्द्र १ सूर्य २ ग्रह ३ नक्षत्र ४ तारका ५ रूपाः, ते

तद्यथा–द्वे पंक्ती चन्द्राणां द्वे च सूर्याणामेकान्तरिते । एकैका च पंक्तिर्भवति षट्षष्टिषट्षष्टिचन्द्रसूर्यसङ्ख्या। तद्भावना चैवम्–एकः किल सूर्यो जम्बूद्वीपे मेरोर्दक्षिणभागे चारं चरन् वर्तते एक उत्तरभागे । तथा एकश्चन्द्रमा मेरोः पूर्वभागे एकोऽपरभागे । तत्र यो मेरोर्दक्षिणभागे सूर्यश्चारं चरन् वर्तते तत्समश्रेणिव्यवस्थितौ द्वौ दक्षिणभागे एव सूर्यौ लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यां सूर्यपंक्तौ षट्षष्टिः सूर्याः । तथा यो मेरोरुत्तरभागे सूर्यश्चारं चरन् वर्तते तस्यापि समश्रेण्या व्यवस्थितौ द्वौ सूर्यौ उत्तरभागे लवणसमुद्रे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यामपि सूर्यपंक्तौ सर्वसङ्ख्यया षट्षष्टिः सूर्याः । तथा यो मेरोः किल पूर्वभागे चारं चरन् वर्तते चन्द्रस्तत्समश्रेणिव्यवस्थितौ पूर्वभागे द्वौ चन्द्रमसौ लवणे, षट् धातकीखण्डे, एकविंशतिः कालोदे, षट्त्रिंशदभ्यन्तरपुष्करार्द्धे इत्यस्यां चन्द्रपंक्तौ सर्वसङ्ख्यया षट्षष्टिश्चन्द्रमसः । एवं यो मेरोरपरभागे चन्द्रमास्तत्सम्बन्धिन्यामपि पंक्तौ षट्षष्टिश्चन्द्रमसो वेदितव्याः । स्थापनाऽत्र विलोक्या ॥ ४ ॥ अथ नक्षत्राणां पंक्तिस्वरूपमाह –

छप्पन्नं पंतीओ, नक्खत्ताणं तु मणुयलोगम्मि ।
छावट्ठी छावट्ठी, होई इक्किकिया पंती ॥ ५ ॥

छप्पन्न० । नक्षत्राणां मनुष्यलोके सर्वसङ्ख्यया षट्पञ्चाशत्पङ्क्तयो भवन्ति । एकैका च पंक्तिर्भवति षट्षष्टिषट्षष्टिनक्षत्रपरिमाणा इत्यर्थः । भावना–किलास्मिन् जम्बूद्वीपे दक्षिणतोऽर्द्धभागे एकस्य शशिनः परि-

दधिकानि त्रीणि शतानि योजनानां ३३०, उभयोर्मीलने दशाधिकानि पञ्चशतानि योजनानामष्टचत्वारिंशदेकषष्टिभागा योजनस्य ५१० ४८/६१। नक्षत्राणामपि चारक्षेत्रमेतदेव, सर्वाभ्यन्तरसर्वबाह्यमण्डलयोः परस्परं दशाधिकपञ्चशतयोजनप्रमाणान्तरालस्योक्तत्वात्। ग्रहाणां तारकाणां च चारक्षेत्रविष्कम्भमानं व्यक्तया शास्त्रेषु नोपलभ्यत इति ॥ ८ ॥ अथ जम्बूद्वीपे चन्द्रयोः सूर्ययोश्च संख्याज्ञापनपूर्वकं प्रत्येकं कति मण्डलानि भवन्तीत्याह—

इह दीवे दुन्नि रवी, दुन्नि य चंदा सया पयासंति।
चुलसीसयमेगेसिं, मंडलमन्नेसि पन्नरस ॥ ९ ॥

इह दीवे०। 'इह' अस्मिन् जम्बूद्वीपे द्वौ सूर्यौ द्वौ च चन्द्रौ सदा प्रकाशयत। तत्र 'एगेसिं'ति प्रथमोद्दिष्टयो रव्योश्चतुरशीत्यधिकं शतं मण्डलानि भवन्ति। 'अन्नेसिं'ति पश्चादुद्दिष्टयोश्चन्द्रयोः पञ्चदश संख्याकानि भवन्ति। नक्षत्रमण्डलानि चाष्टौ सन्ति, तत्स्वरूपं नक्षत्राधिकारे भावयिष्यते ॥ ९ ॥ अथ सूर्यमण्डलानां मिथश्चन्द्रमण्डलानां चान्तराणि कियत्प्रमाणानीत्याह—

दो जोयणंतराइं, सूराण ससीण पंचतीसा य।
तीसमिगसट्ठिभागा, चउरो सत्तसत्तभागा य ॥ १० ॥

दो जोयणं०। सूर्यसम्बन्धिनां मण्डलानामन्तराणि द्वे योजने योजनद्वयप्रमाणानीत्यर्थः, एवंविधान्यन्तराणि सूर्ययोस्त्र्यशीत्यधिकशत-संख्याकानि भवन्ति। चन्द्रसम्बन्धिनां मण्डलानामन्तराणि पञ्चत्रिंश-द्योजनानि त्रिंशच्चैकयोजनस्यैकषष्टिभागा एकस्यैकषष्टिभागस्य सप्तभागा

क्रियन्ते तादृशाश्चत्वारो भागाश्च ३१ ३०/६१ ४/७. एवंविधान्यन्तराणि चन्द्रयोश्चतुर्दश । तेन जम्बूद्वीपे द्वयो सूर्ययोश्चन्द्रयोश्च दक्षिणोत्तरायणे कुर्वतो प्रतिदिनभ्रमिक्षेत्रलक्षणानि निजबिम्बप्रमाणविष्कम्भानि मण्डलानि यथाक्रम सूर्ययो १८४ चन्द्रयो पञ्चदश १५ भवन्ति । तेषां मण्डलानामन्तरालसहितानां विष्कम्भक्षेत्रमानम्–५१० ४८/६१ । तथाहि–सूर्यस्य चतुरशीत्यधिक शत मण्डलानाम, अन्तराणि त्र्यशीत्यधिकं शतम् १८३, एषां विष्कम्भमान द्वे द्वे योजने, ते च त्र्यशीत्यधिकशतेन गुण्येते जातानि षट्षष्ट्यधिकानि त्रीणि शतानि ३६६ । ये च सूर्यसम्बन्धिनोऽष्टचत्वारिंशदेकषष्टिभागा ४८/६१ ते चतुरशीत्यधिकेन शतेन गुण्यन्ते जातान्यष्टाशीतिशतानि द्वात्रिंशदधिकानि ८८३२, तेषां योजनानयनार्थं एकषष्ट्या भागे हृते लब्ध चतुश्चत्वारिंश योजनशत शेषा अष्टचत्वारिंशदेकषष्टिभागा योजनस्य १४४ ४८/६१. एतत्पूर्वराशौ क्षिप्तं जातं च यथोक्तमानम् ५१० ४८/६१ । चन्द्रस्य तु मण्डलविष्कम्भः षट्पञ्चाशदेकषष्टिः भागा योजनस्य , ते ५६/६१, पञ्चदशगुणिता जाताः ८४०, तेषां योजनानयनार्थमेकषष्टिभागहरणे लब्धा १३ शेषा ४७ स्थिताः । मण्डलान्तराणां च प्रत्येक विष्कम्भमान पञ्चत्रिंशद्योजनानि त्रिंशदेकषष्टिभागा योजनस्यैकस्यैकषष्टिभागस्य च सप्तधा छिन्नस्य चत्वारो भागा ३५ ३०/६१ ४/७, पञ्चत्रिंशच्चतुर्दशगुणिता जातानि ४९० योजनानि, त्रिंशद्भागाश्चतुर्दशगुणिता जाता ४२०, सप्तधा छिन्नस्य चत्वारो भागाश्चतुर्दशगुणिता जाताः षट्पञ्चाशत्, ते सप्तभिर्हृता लब्धा ... , ते च चतुरशीतिविंशती क्षिप्ता जाताः ४२८ ते ... या एता लब्धानि योजनानि सप्त शेष एक एकषष्टिभागः

स्थिताः ७$\frac{४}{१०}$ पूर्वोक्तानि योजनानि ११ तथा ४९० तथा ७, सर्वेषां मीलने जातानि योजनानि ५१०, शेषभागाः १ तथा ४७, उभयोर्मीलने $\frac{४}{६१}$ स्थिता इति । इदं चारक्षेत्रचक्रवालविष्कम्भमानम् ॥१०॥
अथ कति मण्डलानि द्वीपे कति च निषधे लवणे च कति सूर्यचन्द्रयोर्भवन्तीति गाथाद्वयेनाह

मंडलमंतरमेयं, रवीण पणसट्ठिमंडला दीवे ।
तत्थ विसट्ठी निसढे, तिन्नि य बाहाइ तस्सेव ॥ ११ ॥
चंदाणं निसढे वि य, मंडल पण गुरुवएसि दीसंति ।
सेसाइं मंडलाइं, दोण्ह वि लवणम्मि मज्झम्मि ॥१२॥

मंडल० । 'सतत' सर्वकाल 'एतत्' पूर्वोक्तं सूर्ययोश्चन्द्रयोश्च मध्ये प्रविशतोर्बहिर्निर्गच्छतोश्च मण्डलानां परस्परमन्तरं ज्ञेयम् । तत्र रव्योः पञ्चषष्टिमण्डलानि जम्बूद्वीपे । तत्रापि द्वाषष्टिर्निषधपर्वते त्रीणि च तस्य बाहायाम्, इदं तु श्रीमुनिचन्द्रसूरिभिरुक्तम् । समवायाङ्गसूत्रे त्रिषष्टिस्थाने "जम्बूद्वीपस्य पर्यन्तिमेऽशीत्युत्तरे योजनशते पञ्चषष्टिर्भवन्ति, तत्र निषधपर्वते नीलवत्पर्वते च त्रिषष्टिः सूर्योदयाः सूर्यमण्डलानीत्यर्थः, तदन्ये तु द्वे जगत्याम्, शेषाणि तु लवणे" इत्युक्तमस्ति । सङ्ग्रहणीवृत्तावपि "त्रिषष्टित्रिषष्टिमण्डलानि निषधनीलवतोः, द्वे द्वे हरिवर्षरम्यकयोः । " तत्तत्त्वं सर्वविद्वेद्यम् ॥ ११ ॥ तथा-चंदा० । चन्द्रयोर्निषधनीलवत्पर्वते एव पञ्च मण्डलानि गुरूपदेशे दृश्यन्ते, शेषाणि मण्डलानि द्वयोरपि लवणे ११९ सूर्यस्य दश १० चन्द्रस्य च भवन्ति । तत्राप्ययं विशेषः – १–२–३–४–५–११–१२–१३–१४–१५ एतानि चन्द्रमण्डलानि सूर्यस्यापि साधारणानि । अथ ६–

भिद्यन्ते सहस्राश्चत्वारो भागाश्च २१३; १६. एवंविभागमन्तराणि चन्द्रयोश्चतुर्दश । तेन जम्बूद्वीपे द्वयोः सूर्ययोश्चन्द्रयोश्च प्रतिनि- यतमन्ते कुर्वतो प्रतिदिनमिशेत्रक्षणानि निजबिम्बप्रमाणविष्कम्भाणि मण्डलानि यथाक्रमं सूर्ययो १८४ चन्द्रयोः पञ्चदश १५ भवन्ति । तेषां मण्डलानामन्तरालसहितानां विष्कम्भोऽयमानम्-५१० ४८/६१ । अत्र सूर्येण जम्बूद्वीपमध्ये अशीतं मण्डलशतम्, अन्तरालानि त्र्यशी- त्यधिकं शतम् १८३, एषां विष्कम्भमाने ४८/६१ योजने, ते च त्र्यशी- त्यधिकशतेन गुणितो जातानि एकपञ्चाशदधिकानि त्रीणि शतानि ३५१ । [illegible] ते चतुरशीत्यधिकेन [illegible] ८८३२, तेषां [illegible] चतुरशीत्या योजनान [illegible] मानमस्य १४४ [illegible] [illegible] मानम १०० [illegible] । चन्द्रस्य तु [illegible] योजनस्य [illegible] माना [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

स्थितः ७ १/६१, पूर्वोक्तानि योजनानि ११ तथा ४९० तथा ७, सर्वेषां मीलने जातानि योजनानि ५१०, शेषभागाः १ तथा ४७, उभयोर्मीलने ४८ स्थिता इति । इदं चारक्षेत्रचक्रवालविष्कम्भमानम् ॥१०॥

अथ कति मण्डलानि द्वीपे कति च निषधे लवणे च कति सूर्यचन्द्रयोर्भवन्तीति गाथाद्वयेनाह

संततमंतरमेयं, रवीए पणसट्ठिमंडला दीवे ।
तत्थ विसट्ठी निसढे, तिन्नि य बाहाइ तस्सेव ॥ ११ ॥
चंदाणं निसढे वि य, मंडल पण गुरुवएसि दीसंति ।
सेसाइं मंडलाइं, दोण्ह वि जलहिस्स मज्झम्मि ॥१२॥

संतत० । 'सतत' सर्वकाल 'एतत्' पूर्वोक्तं सूर्ययोश्चन्द्रयोश्च मध्ये प्रविशतोर्बहिर्निर्गच्छतोश्च मण्डलानां परस्परमन्तरं ज्ञेयम् । तत्र रव्योः पञ्चषष्टिमण्डलानि जम्बूद्वीपे । तत्रापि द्वाषष्टिर्निषधपर्वते त्रीणि च तस्य बाहायाम्, इदं तु श्रीमुनिचन्द्रसूरिभिरुक्तम् । **समवायाङ्गवृत्तौ त्रिषष्टिस्थाने** "जम्बूद्वीपस्य पर्यन्तिमेऽशीत्युत्तरे योजनशते पञ्चषष्टिर्भवन्ति, तत्र निषधपर्वते नीलवत्पर्वते च त्रिषष्टिः सूर्योदयाः सूर्यमण्डलानीत्यर्थः, तदन्ये तु द्वे जगत्यां, शेषाणि तु लवणे" इत्युक्तमस्ति । **सङ्ग्रहणीवृत्तावपि** "त्रिषष्टिस्त्रिषष्टिर्मण्डलानि निषधनीलवतोः, द्वे द्वे हरिवर्षरम्यकबाह्वोः ।" तत्तत्त्वं सर्वविद्वेद्यम् ॥ ११ ॥ तथा–चंदा० । चन्द्रयोर्निषधनीलवत्पर्वत एव पञ्च मण्डलानि गुरूपदेशे दृश्यन्ते, शेषाणि मण्डलानि द्वयोरपि जलधौ ११९ सूर्यस्य दश १० चन्द्रस्य च भवन्ति । तत्राप्ययं विशेषः — १–२–३–४–५–११–१२–१३–१४–१५ एतानि चन्द्रमण्डलानि सूर्यस्यापि साधारणानि । षट् ६–

योजनानां १०१९ शेषा भागाः $\frac{४३}{६१}$, तत्र यदा चन्द्रप्रथममण्डलविष्कम्भे ९९६४० योजनरूपे क्षिप्यन्ते तदा सर्वबाह्ये मण्डले द्वयो श्चन्द्रयोर्मिथोऽन्तरं योजनानि १००६५९ $\frac{४३}{६१}$ । तत्परिधियोजनानि ३१८३१५ किञ्चिदूनानि ॥ तथा सर्वाभ्यन्तरे मण्डले द्वयोः सूर्ययो मिथोऽन्तरं योजनानि ९९६४०, तत्परिधियोजनानि ३१५०८९ किञ्चिदधिकानि । द्वितीयादिसूर्यमण्डलेषु प्रतिमण्डले विष्कम्भवृद्धिर्योजनानि ५ $\frac{३५}{६१}$ । तत्परिधियोजनानि १७ $\frac{३८}{६१}$, यत पञ्च एकषष्ट्या गुणिताः पञ्चत्रिंशत्सहिताश्च ३४०, ते वर्गिता दशगुणिताश्च जाता ११५६०००, एतस्य मूलानां करणीकरणे १०७५ आगताः, शेषाः ३७५ स्थिताः, आगतानां ६१ भागहरणे १७ $\frac{३८}{६१}$ । अयं परिरयो यदि सूर्यस्य प्रथमादिमण्डलपरिरये क्षिप्यते तदा द्वितीयादिसूर्यमण्डलपरिधिप्रमाणमागच्छति । अत्रापि विष्कम्भवृद्ध्यानयनोपायो यथा—सूर्यस्य मण्डलान्तरं योजने द्वे, तद्द्विगुणत्वे चत्वारि, सूर्यविमानं चाष्टचत्वारिंशद्भागमितम्, तद्द्विगुणं षण्णवतिर्भागाः, तेषामेकषष्ट्या भागैरेकं योजनं, तच्चतुर्षु क्षिप्तं जातं योजनपञ्चकं शेषाः पञ्चत्रिंशद्भागाः ५ $\frac{३५}{६१}$, एतच्च त्र्यशीत्यधिकशतेन गुण्यते जातं योजनानां विंशत्युत्तरं सहस्रम् १०२०, तच्च सर्वाभ्यन्तरमण्डलविष्कम्भे ९९६४० रूपे मील्यते तदा सर्वबाह्ये मण्डले द्वयोः सूर्ययोर्मिथोऽन्तरं १००६६० भवति । तत्परिधियोजनानि ३१८३१५ । चन्द्रयोरिव सर्वाभ्यन्तरे सर्वबाह्ये च मण्डले सूर्ययोरप्यबाधाप्रमाणमवसेयम् । नवरं चन्द्रस्य सूर्यापेक्षया षोडशभिरेकषष्टिभागैर्न्यूनमन्तरम्, यत एकोऽपि चन्द्रोऽष्टाचत्वारिंशदेकषष्टिभागान् सूर्यादभ्यन्तरमाक्रामति, एवमपरोऽपि समवसेयः, तत्र षोडशभि

बावट्ठि पुण्णरूवा, तेवीसं अंसगा य बोधव्वा ।
दो चेव इक्कवीसा, छेओ पुण तेसि बोधव्वो ॥ २३ ॥

बावट्ठि० । चन्द्रस्यैकैकमण्डले भ्रमिकालः 'द्वाषष्टिः पूर्णरूपाणि' पूर्णा द्वाषष्टिर्मुहूर्ता इत्यर्थः, त्रयोविंशतिरंशाश्चैकस्य मुहूर्तस्यैकविंशत्यधिकशतद्वयभागरूपा बोद्धव्या ६२ $\frac{२३}{२२१}$, एतावत्कालप्रमाणं चन्द्रस्यैकैकमण्डले परिभ्रमतो लगति । अत्रांशस्वरूपं सूत्रेणवाह- 'छेओ' त्ति छेदो–विभजनाङ्कः पुनः 'तेषां' मुहूर्तांशानामेकविंशत्यधिकशतद्वयरूपो बोद्धव्यः ॥ २३ ॥

एएण य भइअव्वो, मंडलरासी हविज्ज जं लद्धं ।
सा सोममुहुत्तगई, तहिं तहिं मंडले निअमा ॥ २४ ॥

एएण० । 'एतेन च' अनन्तरोक्तराशिना द्वाषष्टिमुहूर्तादिरूपेण मण्डलपरिधिराशिर्भक्तव्यः, भक्ते सति भवेद्यल्लब्धं सा सोमस्यैकैकमुहूर्ते गतिर्भवति तस्मिन् तस्मिन् मण्डले नियमात् । भावना यथा– सवर्णनार्थं द्वाषष्टिमुहूर्ता एकविंशत्यधिकशतद्वयगुणाः क्रियन्ते, जाताः १३७०२, उपरितनांशास्त्रयोविंशतिः क्षिप्यन्ते जातानि त्रयोदशसहस्राणि पञ्चविंशत्यधिकानि सप्तशतानि १३७२५, चन्द्रस्य सर्वाभ्यन्तरमण्डलपरिधियोजनानि ३१५०८९ रूपः, सोऽपि २२१ गुणः क्रियते जातः षट्को नवकः षट्कस्त्रिकश्चतुष्कः षट्कः षट्को नवकश्चेति ६९६३४६६९, अस्य राशेः पूर्वोक्तेन त्रयोदशसहस्रपञ्चविंशत्यधिकसप्तशतप्रमिताङ्केन १३७२५ भागहारे लब्धानि योजनानि ५०७३ अंशाः $\frac{७७४४}{१३७२५}$, एषा चन्द्रस्याभ्यन्तरमण्डले मुहूर्तगतिः । द्वितीये

चन्द्रमण्डले परिधिर्योजनानि ३१५३१९, सोऽपि २२१ गुणितो जातः षट्को नवकः षट्कोऽष्टकः पञ्चकश्चतुष्को नवको नवकश्चेति ६९६८५४९९, अस्य राशेः पूर्वोक्तेन १३७२५ राशिना भागे लब्धानि योजनानि ५०७७ $\frac{३६७४}{१३७२५}$, एषा द्वितीये मण्डले चन्द्रस्यैकमुहूर्ते गतिः । एवं मण्डले मण्डले परिधिवृद्ध्या पूर्वपूर्वापेक्षया मुहूर्तगतिप्रमाणं प्रतिमण्डलं किञ्चिदूनपादोनचतुर्योजनवृद्ध्या तावज्ज्ञेयं यावत्सर्वबाह्यं मण्डलम् । तत्र च परिधियोजनानि ३१८३१५, अयमपि २२१ गुणितो जातः सप्तकः शून्यं त्रिकश्चतुष्कः सप्तकः षट्कः एककः पञ्चकश्चेति ७०३४७६१५, अस्य राशेः १३७२५ भागे लब्धानि योजनानि ५१२५ $\frac{६९९०}{१३७२५}$, एतावती सर्वबाह्ये मण्डले चन्द्रस्य प्रतिमुहूर्तं गतिः ॥ २४ ॥ अथ सूर्यस्य मुहूर्तगतिकरणमाह—

मंडलपरिरयरासी, सट्ठी भइयम्मि होइ जं लद्धं ।
सा रविमुहुत्तगई, तहिं तहिं मंडले नियमा ॥ २५ ॥

मंडलपरिर० । सूर्यस्य मण्डलपरिधिराशिः षष्ट्या ६० भज्यते, भक्ते सति यल्लब्धं भवति सा सूर्यस्यैकमुहूर्तगतिर्भवति तत्र तत्र मण्डले नियमात् । अत्र मण्डलपरिरयराशेः षष्ट्या भागकरणान्मण्डलभ्रमिकालस्य षष्टिमुहूर्तप्रमाणता ज्ञेया । भावना यथा—सूर्यस्य सर्वाभ्यन्तरे मण्डले परिधिः ३१५०८९, तस्य मण्डलभ्रमिमुहूर्तराशिना षष्ट्या ६० भागे लब्धानि ५२५१ $\frac{२९}{६०}$, एषा सर्वाभ्यन्तरे मण्डले सूर्यस्य प्रतिमुहूर्तं गतिः । पूर्वपरिधौ सप्तदशसङ्ख्येऽपि षट्कः समायाति, तेन पञ्चत्रिंशत्षष्टिभागानां परिधेरधिकतायाश्च सर्वान्ते एकं योजनं भवति, तत्र

सवर्णनार्थं सप्तषष्ट्यधिकशतत्रयगुणाः क्रियन्ते जाते ५१६५३, उपरितनानामंशानां च क्षेपे जातान्येकविंशतिसहस्राणि नवशतानि षष्ट्यधिकानि २१९६०, सर्वाभ्यन्तरे नक्षत्रमण्डले परिधि ३१५०८९, स च ३६७ गुण क्रियते- एककः एककः पञ्चकः षट्कत्रिकः सप्तकः षट्कः षट्कत्रिकश्चेति ११५६३७६६३, अस्य पूर्वेण २१९६० भागे लब्धानि योजनानि पञ्चसहस्राणि पञ्चषष्ट्यधिके द्वे च शते एकस्य योजनस्य चैकविंशतिसहस्राणि षष्ट्यधिकानि नवशतानि भागाः क्रियन्ते तत्संबन्धिनोऽष्टादशसहस्राणि त्रिषष्ट्यधिके द्वे च शते भागाः $५२६५\frac{१८२६३}{२१९६०}$, एतावती प्रतिमुहूर्तं सर्वाभ्यन्तरे मण्डले वर्तमानाना मभिजिदादिद्वादशनक्षत्राणां गतिः। एवं तृतीयादिचन्द्रमण्डलानां परिधिप्रमाणं परिभाव्य तत्तन्मण्डलस्थशेषनक्षत्राणामपि प्रतिमुहूर्तं गति प्रमाणमवसातव्यम्, तत्र प्रथमे चन्द्रमण्डलेऽभिजित् १ श्रवण २ धनिष्ठा ३ शततारका ४ पूर्वभाद्रपद ५ उत्तरभाद्रपद ६ रेवती ७ अश्विनी ८ भरणी ९ पूर्वफाल्गुनी १० उत्तरफाल्गुनी ११ स्वाति १२ नक्षत्राणि भवन्ति १, तृतीये चन्द्रमण्डले पुनर्वसु १ मघा २ द्वे नक्षत्रे २, षष्ठे चन्द्रमण्डले कृत्तिका ३, सप्तमे चन्द्रमण्डले रोहिणीचित्रे द्वे ४, अष्टमे चन्द्रमण्डले विशाखा ५, दशमे चन्द्रमण्डले अनुराधा ६, एकादशमे चन्द्रमण्डले ज्येष्ठा ७, पञ्चदशे चन्द्रमण्डले मृगशीर्ष १ आर्द्रा २ पुष्य ३ अश्लेषा ४ हस्त ५ मूल ६ पूर्वाषाढा ७ उत्तराषाढा ८ अष्टौ सन्ति, शेषेषु द्वितीयचतुर्थपञ्चमनवमद्वादशत्रयोदशचतुर्दशमण्डलेषु सप्तसु चन्द्रमण्डलेषु नक्षत्राणि न सन्ति। सर्वबाह्ये नक्षत्रमण्डले परिधि ३१८३१५, एतेऽपि

६० । प्रतिमण्डलं द्वयोर्मुहूर्तैकषष्टिभागयोर्दिनस्य

अयमर्थः- एकस्य मुहूर्तस्यैकषष्टिभागा क्रियन्ते तस्मा

भागौ हीयेते । 'अंते' इति सर्वबाह्यमण्डले वर्तमाने सूर्ये

दिनं भवति । अथ त्रैराशिककरणं ज्ञेयम् यद्यशीत्यधि

षण्मुहूर्तानां हानिस्तदैकेन दिनेन का हानि ? इति, राशि

यथा- १८३ ६ १ मध्योऽन्त्यगुण क्रियते, तथैन गुणि

भवति जाता षट्, आदिना च भागाऽप्राप्तौ षष्टेकषष्टिगुणा

जाता ३६६, तं त्र्यशीत्यधिकशतेन भज्यन्ते लब्धौ द्वौ मुहूर्तै

भागौ ६१ एतौ कर्कात्प्रभृति प्रतिदिनं हीयेते, मकरात्प्रभृति प्र

वर्द्धेते । यच्च भगवत्यामेकादशे शते एकादशोद्देशके एकन्द

शत्य द्वाविंशत्यधिकं शतं भागा क्रियन्ते तादृशाश्चत्वारो भागा

वृद्धौ प्रोक्ता, अष्टैकषष्ट्यौ द्वौ भागौ, द्वयोस्तात्पर्यमेव । एता

विंशत्यधिकं पञ्चगुणं शतं, यथा पञ्चानि ६ अष्टशतानि ०६ एकाशत

जाता ६१, यत्र १८३ दिने षण्मुहूर्ता वर्द्धन्ते प्रतिमुहूर्तं यत्रा

१२०, तानि च षड्गुणानि ७२०, तानि त्र्यशीत्यधिकेन शतेन भज्यन्ते

भक्तानि प्राप्तानि ३ चत्वारि, शेषं १७१, तानि भागाऽप्राप्तौ चत्वारश

गुणितानि १०८६०, तेऽष्टा १८३ भक्ता लब्धा ६६ एता, द्वैता

एकष्याश्चत्वारश द्वादश भागाश्च ६१ । तथा निशा सम्म विशेषि 'नि

निशा-रात्रिर्दिनाद्विपरीता ज्ञेया, कोऽर्थः ? यदा दिनमष्टादशमुहूर्तं

तदा निशा द्वादशमुहूर्ता, यदा दिनं द्वादशमुहूर्तं तदा निशाऽष्टादश-

मुहूर्ता । तथापि हानिवृद्धी दिनवद्भवेते ॥ ६० ॥ अथ सर्वमण्डले सप्तमे

तथा सर्वबाह्यमण्डलयोर्मुहूर्तैकषष्टिभागप्रमाणमाह-

८८० । प्रतिमण्डलं द्वयोर्मुहूर्तैकषष्टिभागयोर्दिनस्य हानिर्भवति । अयमर्थः—एकस्य मुहूर्तस्यैकषष्टिभागाः क्रियन्ते तत्सम्बन्धिनौ द्वौ भागौ हीयेते । 'अंते' इति सर्वबाह्यमण्डले वर्तमाने सूर्ये द्वादशमुहूर्तं दिनं भवति । अत्र त्रैराशिककरणं ज्ञेयम्—यद्यशीत्यधिकशतदिनैः षण्मुहूर्तानां हानिस्तदैकेन दिनेन का हानिः ? इति, राशित्रयन्यासो यथा—१८३—६—१ मध्योऽन्त्यगुणः क्रियते, एकेन गुणितं तदेव भवति जाताः ६, आद्येन च भागाऽप्राप्तौ षडेकषष्टिगुणाः क्रियन्ते जाताः ३६६, ते त्र्यशीत्यधिकशतेन भज्यन्ते लब्धौ द्वौ मुहूर्तैकषष्टिभागौ $\frac{२}{६१}$, एतौ कर्कात्प्रभृति प्रतिदिनं हीयेते, मकरात्प्रभृति प्रतिदिनं वर्द्धेते । यच्च भगवत्यामेकादशे शत एकादशोद्देशके—एकस्य मुहूर्तस्य द्वाविंशत्यधिकं शतं भागाः क्रियन्ते तादृशाश्चत्वारो भागा हानौ वृद्धौ प्रोक्ताः, अत्रैकषष्टिकौ द्वौ भागौ, उभयोर्नार्थभेदः । एतावता किञ्चिदूनं पलचतुष्कं जातं, यथा पलानि ३ अक्षराणि ५६ एकाक्षरस्य भागाः $\frac{१२}{१८३}$, यतः १८३ दिनैः षण्मुहूर्ता वर्द्धन्ते प्रतिमुहूर्तं पलानि १२०, तानि च षड्गुणानि ७२०, तानि त्र्यशीत्यधिकेन शतेन भज्यन्ते लब्धानि त्रीणि ३ पलानि, शेषं १७१, तानि भागाप्राप्तौ षष्ट्यक्षरगुणितानि १०२६०, तेऽपि १८३ भक्ता लब्धा ५६ वर्णाः, शेषा एकस्याक्षरस्य द्वादश भागाश्च $\frac{१२}{१८३}$ । तथा 'निसा तस्स विवरीआ' त्ति निशा—रात्रिर्दिनाद्विपरीता ज्ञेया, कोऽर्थः ? यदा दिनमानमष्टादशमुहूर्तं तदा निशा द्वादशमुहूर्ता, यदा दिनं द्वादशमुहूर्तं तदा निशाऽष्टादशमुहूर्ता । अत्रापि हानिवृद्धी दिनवज्ज्ञेये ॥ ८९ ॥ अथ सर्वबाह्ये मण्डले तथा प्रथमद्वितीयसर्वमण्डलेषु सूर्यस्योदयास्तान्तरयोजनसंख्यामाह—

वर्त्तिग्रहादिसंख्या स्वयं ज्ञेया, यन्त्रकाद्वावधार्या। अत्र तारकाणां बहुत्वात्क्षेत्रस्य स्तोकत्वाच्च केचित्कोटाकोटिमिति संज्ञान्तरं मन्यन्ते। केचिच्च तारकविमानान्युत्सेधाङ्गुलप्रमाणेन मन्यन्ते। किञ्चैतत्सैन्यं सूर्यस्यापि साधारणम्, चन्द्रस्येव तत्सैन्यस्य सूर्योऽप्यधिप इति, यदुक्तं जीवाभिगमे ज्योतिष्कोद्देशे—"एगमेगस्स णं भंते! चंदिमसूरियस्स चंदिमसूरिअस्स केवइओ परिवारो पन्नत्तो?" त्ति सूत्रम्। अस्य वृत्त्येकदेशो यथा—'एकैकस्य भदन्त! चन्द्रसूर्यस्य चन्द्रसूर्यस्य' अनेन च पदेन यथा नक्षत्रादीनां चन्द्रः स्वामी तथा सूर्यस्यापि तस्यापीन्द्रत्वादिति ख्यापयति। यद्वा समवायाङ्गवृत्तावष्टाशीतिस्थानकेऽप्ययमेवाभिप्रायोऽस्ति तेन चन्द्रसूर्यौ ग्रहेभ्यो भिन्नौ तौ ग्रहाधिपौ ज्ञेयौ॥२१॥

नामानि.	जम्बूद्वीपे	लवणाब्धौ	धातकीखण्डे	कालोदे	पुष्करार्धे	सर्वसंख्या.
चन्द्रसूर्या.	२	४	१२	४२	७२	१३२
ग्रहा	१७६	३५२	१०५६	३६९६	६३३६	११६१६
नक्षत्राणि	५६	११२	३३६	११७६	२०१६	३६९६
तारककोटि कोट्य	१३३९५ शू० १५	२६७९ शू० १६	८०३७ शू० १६	२८१२९५ शू० १५	४८२२२ शू० १६	८८४०७ शू० १६

अथ चन्द्रसूर्याणां केन प्रकारेण कदा प्रकाशक्षेत्रं वर्धते? कदा च हीयते? तदाह—

सर्वोत्कृष्टदिवसे जम्बूद्वीपस्य दशभागपरिकल्पितस्यैकसूर्यस्य तापक्षेत्रे कियन्तो भागाः ? इत्याह—

दीवस्स य दसभागा, इगपासे हुंति तिन्नि दिवसस्स ।
कक्कस्स य पढमदिणे, भागा पुण दुन्नि रयणीए ॥ ३३ ॥

दीव० । द्वीपस्य त्रय दशभागा एकैकपार्श्वे ' दिवसस्य ' सूर्यतापक्षेत्रस्य कर्कसंक्रान्तिप्रथमदिने भवन्ति । कोऽर्थः ? दशधाविभक्ते जम्बूद्वीपचक्रवाले यल्लब्धं तादृशास्त्रयो भागा एकस्मिन्पार्श्वे दक्षिणत उत्तरतो वा । तदा तत्र पुनर्द्वावन्तरौ द्वौ भागौ भवतः । दिवससत्कभागत्रययोजनानि ९४५२६$\frac{७}{१०}$, रात्रिसत्कत्रिभागद्वययोजनानि ६३०१७$\frac{८}{१०}$, उभयोर्मीलने १५७५४४$\frac{५}{१०}$ । एवं द्वितीयसूर्यस्यापि दिनं रात्रिश्च, सर्वमीलने ३१५०८९ सर्वाभ्यन्तरमण्डलपरिधिर्जातः । अत्र मेरुं प्रति नवयोजनसहस्राणि चत्वारि शतानि षडशीत्यधिकानि नव च दश भागा योजनस्येत्यभ्यन्तरमर्यादयाऽपि दशभागत्रयरूपं तापक्षेत्रप्रमाणं भवति ९४८६$\frac{९}{१०}$ । कथम् ? मन्दरपरिक्षेपस्य किञ्चिन्न्यूनत्रयोविंशत्युत्तरषट्शताधिकैकत्रिंशद्योजनसहस्रमानस्य ३१६२३ दशभिर्भागे हृते यल्लब्धं तस्य त्रिगुणत्वे एतस्य भावादिति । जघन्यदिवसे तु मेरुं प्रति भागद्वयं षड्योजनसहस्राणि त्रीणि शतानि चतुर्विंशत्यधिकानि षट् च दशभागाः ६३२४$\frac{६}{१०}$ ॥ ३३ ॥ अथ क्रमेण हीयमानं जघन्यदिवसे यावत्प्रमाणं तापक्षेत्रमवशिष्यते तदाह—

मयरम्मि दुन्नि भागा, दिवसस्स य हुंति तिन्नि रयणीए ।
एवं तावक्खेत्तं, दिवसराईवुड्ढिहाणीओ ॥ ३४ ॥

मय० । मकरसंक्रान्तेर्द्वितीयदिनादारभ्य षड्भिर्मासैर्यावन्मकरसंक्रान्त्याद-

सुक्खित्ते ॥ २ ॥" उत्कृष्टदिवसे एतावद्योजनत उदितं पश्यन्ति, तत्रे-तावत्क्षेत्रपरिधिसद्भावात् । परमिदं सर्वाभ्यन्तरमण्डलं मानुषोत्तरादर्वाक् संभवति, येन शेषमण्डलानामवकाशो दशोत्तरपञ्चशतयोजनान्तर्विलो-क्यत इति, तेनोक्ततेजःप्रसरः कतिचिन्महर्षेर्न्यूनो ज्ञेयः । नवरमियान् विशेषः--जम्बूद्वीपगतसूर्ययोर्दक्षिणोत्तरयोः करप्रसरेभ्यो लवणसमुद्रगत-चन्द्रसूर्याणां दक्षिणोत्तरयोः करप्रसरः स्तोकः, पूर्वपश्चिमयोश्च भूयान्, क्षे-त्रस्य परिधिबाहुल्यात् । धातकीखण्डे च षण्णां षण्णां पङ्क्तिगतसूर्याणामु-त्तरोत्तरं दक्षिणोत्तरयोस्तेजःप्रसरः स्तोकः पूर्वपश्चिमयोश्च वर्धते । एवं का-लोदे पुष्करार्द्धेऽपि पूर्वपश्चिमयोरतिबहुलो वर्धत इति स्थितिः । परं यो य सूर्यो यत्र यत्र चरति तद्वासिनो जनास्तमेव सूर्यं पश्यन्ति नान्यं तथाजगत्स्वाभाव्याद्यवस्थाभङ्गदोषप्रसङ्गाच्च । एवं चन्द्रग्रहादीनामपि व्यवस्था भावनीया ॥ ४४ ॥ अथ तेषां रवीणां दशभागादिस्वरूपमाह--

सव्वपरिहीण एवं, सव्वे वि य माणुसो दसंसतिगं ।
तावंतुक्कोसदिणे, जहन्नए दुन्नि उ दसंसे ॥ ४५ ॥

सव्व० । लवणधातकीकालोदपुष्करार्द्धेषु सर्वपरिधीनां 'एवं' अमु-ना प्रकारेण जम्बूद्वीपन्यायेन सर्वेऽपि भानवः 'दशांशत्रिकम्' इति त्रीन् दशभागान् कर्कस्था युगपत्सर्वाभ्यन्तरमण्डले संचरन्त उत्कृष्टदि-वसे तापयन्ति, तदा दिनमानमष्टादशमुहूर्तम्, रात्रिर्द्वादशमुहूर्ता । जघन्यदिवसे समकं सर्वबाह्यमण्डलस्था मकरे द्वौ दशभागौ तापयन्ति, तदा दिनमानं द्वादशमुहूर्तं, रात्रिरष्टादशमुहूर्ता । सर्वेषां सूर्याणां चतुर-शीत्यधिकशतमण्डलेषु प्रत्येकं षष्ट्या मुहूर्तैरेव समकं परिभ्रमणात् ॥

सुखिद्दि ॥ २ ॥" उत्कृष्टदिवसे एतावद्योजनत उदितं पश्यन्ति,
तावत्क्षेत्रपरिधिसद्भावात् । यदिदं सर्वाभ्यन्तरमण्डलं मानुषोत्तराद
संभवति, येन शेषमण्डलानामवकाशो ऽस्योत्तरपञ्चशतयोजनान्तर्वि
चयत इति, तेनोक्तनेत्रप्रसरः कतिचित्सहस्रैर्न्यूनो ज्ञेयः । लवणमि
विशेष —जम्बूद्वीपगतसूर्ययोर्दक्षिणोत्तरयोः क्रमप्रसरेभ्यो लवणसमुद्र
चन्द्रसूर्याणां दक्षिणोत्तरयोः क्रमप्रसरः स्तोकः, पूर्वपश्चिमयोश्च भूयान्
त्रस्य परिधिबाहुल्यात् । धातकीखण्डे च षण्णां षण्णां पङ्क्तिगतसूर्याण
तरोत्तरं दक्षिणोत्तरयोस्तेजःप्रसरः स्तोकः पूर्वपश्चिमयोश्च वर्धते । एवं
लोदे पुष्करार्धेऽपि पूर्वपश्चिमयोरनिवारितो वर्धत इति स्थितिः । यं
स सूर्यो यत्र यत्र चरति तदधोवासिनो सनामस्तमेव सूर्यं पश्यन्ति
तथाजगत्स्वाभाव्याद्व्यवस्थाभङ्गदोषप्रसङ्गाच्च । एवं चन्द्रग्रहादीना
व्यवस्था भावनीया ॥४४॥ अथ तेषां सर्वेषां दशभागादिस्वरूपमाह

सव्वपरिहीण एवं, मज्झे ति स भाणुणो दसंसतिगं ।
तावंतुक्कोसदिणे, जहन्नए दुन्नि उ दसंसे ॥ ४५ ॥

सव्व० । लवणधातकीकालोदपुष्करार्द्धेषु सर्वपरिधीनां 'एवं'
ना प्रकारेण जम्बूद्वीपन्यायेन सर्वेऽपि भानवः 'दशांशत्रिकम्'
त्रीन् दशभागान् पर्यन्त्या युगपत्सर्वाभ्यन्तरमण्डले सञ्चरन्त उत्कृ
दसे तापयन्ति, तदा दिनमानमष्टादशमुहूर्तम्, रात्रिर्द्वादशमु
जघन्यदिवसे सकल सर्वबाह्यमण्डलस्थाः सन्तो द्वौ दशभागौ ताप
तदा दिनमानं द्वादशमुहूर्तं, रात्रिरष्टादशमुहूर्ता । सर्वेषां सूर्याणां
द्वीपाधिकारमण्डलेषु प्रत्येकं षष्ट्या मुहूर्तैरेव समस्तं परिभ्रमन्त

४५ ॥ अथ तेषामपि सूर्याणां चारक्षेत्रतः प्रवेशतो कियद्भिर्दिनैस्तापक्षेत्रं वर्धते हीयते च ? इत्याह -

एवं च सइ दसंसे, तेसिं पइसंतनीहरंताणं ।

वड्ढइ हायइ तेत्तीसएण दिवसाण अणुकमसो ॥ ४६ ॥

एवं० । ' एवं ' पूर्वोक्तप्रकारे सति ' तेषां ' सूर्याणां सदैव सर्वबाह्यान्मण्डलान्मध्ये प्रविशता कर्के च सर्वाभ्यन्तराद्बहिर्निर्गच्छतां दिवसाना त्र्यस्त्रिंशत्यधिकशतेनानुक्रमशः एकैको दशांशो वर्धते हीयते च । वृद्धिहानियोजनसंख्या दशमभागयोजनसंख्या च तत्तद्द्वीपसमुद्राणां मध्यबाह्यपरिध्यनुसारेण वाच्या ॥ ४६ ॥ अथ जम्बूद्वीपादन्यरवीणां मण्डलसंख्या मण्डलान्तरप्रमाणं चारक्षेत्रविष्कम्भमानं चाह—

सव्वेसिं पि रवीणं, सव्वेसिं मंडलाण अन्तुत्तं ।

दोजोअणंतरालं, पंचसयदसुत्तरो चारो ॥ ४७ ॥

सव्वे० । सर्वेषां रवीणां चतुरशीत्यधिकशतसंख्यानां मण्डलानामन्तरं प्रत्येकं द्वे योजने, चारक्षेत्रविष्कम्भस्तु दशोत्तराणि पञ्चशतयोजनानि ज्ञेयानि । अष्टचत्वारिंशदेकषष्टिभागास्तु स्तोकत्वान्नोक्ताः । अथवा प्रथममण्डलस्यान्त्यमण्डलस्य वा चाराभावादष्टचत्वारिंशन्नोक्ता, जम्बूद्वीपाधिकारे चोक्ता, परमार्थस्त्वेक एव ॥ ४७ ॥ अथ शेष चन्द्राणां चारक्षेत्रमानादिस्वरूपमाह

इगसट्ठंसतिवन्ना, चंदाणं पंचनवहिअसयाइं ।

अट्ठहि भागेहि जुओ, अब्भहिअं मण्डलं ससिणो ॥४८॥

इग० । जम्बूद्वीपचन्द्राणामपि प्रत्येकं मण्डलानि पञ्चदशैव, तेषां मण्डलानां भूमिरन्तरं च मानेनैव पञ्चत्रिंशद्योजनानि ३५ [illegible]

एतस्मिन् चतुर्दशमुहूर्ते एते सकल चारक्षेत्रे नवाधिकशतद्वानवोमनमित त्रिसहस्रचैकषष्टिभागयुत १०९ ३३. मन काष्ठादष्टभिर्भागैरधिकं सूर्यबिम्बाचन्द्रबिम्बं प्रत्ययाद्गमनात्वात् । अत्रापि विमानाक्रान्त क्षेत्रगमनाद्दृष्टचारादिगमनानामभावेऽपि पूर्वोक्तेन सह न विशेष ॥४८॥ अथ सर्वेषु क्षेत्रेषु दिग्व्यवस्थानिर्णयस्वरूप गाथायुगलेनाह—

जस्स जओ आइच्चो, उदेइ सा तस्स होइ पुव्वदिसा ।
जत्थ य अत्थमेई, अवरदिसा सा उ नायव्वा ॥ ४९ ॥
दाहिणपासम्मि य दाहिणा उ वामम्मि उत्तरा होइ ।
एयाओ तायदिसा, सव्वेसिं उत्तरो मेरू ॥ ५० ॥

जस्स० । यस्य लोकस्य यत स्थानादादित्य उदयमेति-उदयं याति तस्य लोकस्य सैव पूर्वदिग् ज्ञेया । तथा यत्र स्थाने सूर्योऽस्तमेति अदर्शनतां गच्छति 'अवरा' पश्चिमा च ज्ञातव्या ॥ ४९ ॥ दाहि० । उदयमानसूर्याभिमुखमवतस्थस्य लोकस्य दक्षिण पार्श्वे दक्षिणा भवति वामपार्श्वे तूत्तरा । भावना यथा—पूर्वविदेहानां लोकानां या पश्चिमा सा भरतसम्बन्धिना पूर्वा, भरते या पश्चिमा सा पश्चिमविदेहेषु पूर्वा, पश्चिमविदेहेषु या पश्चिमा सा ऐरावते पूर्वा, ऐरावते या पश्चिमा सा पूर्वविदेहेषु पूर्वेत्यादि । सूक्ष्मेक्षिकया मौगलि कक्षेत्रवर्षधरादिषु सर्वत्र पूर्वादयो दिशो विचार्या । यतो जम्बूद्वीप-प्रज्ञप्त्याम्—"जम्बुद्दीवे णं भंते ' सूरिआ उदीणपाईणमुग्गच्छ पाईणदा-हिणमागच्छंति ? १ पाईणदाहिणमुग्गच्छ दाहिणपडीणमागच्छंति ? २ दाहिणपडीणमुग्गच्छ पडीणउदीणमागच्छंति ? ३ पडीणउदीणमुग्गच्छ

एतस्मिन् चतुर्दशगुणे एते समस्तं चारक्षेत्रं नवाधिकपञ्चशतयोजनमित त्रिपञ्चाशदेकषष्टिभागयुतं ५०९ ५३/६१. यत कारणादष्टभिर्भागैरधिकं सूर्यबिम्बाच्चन्द्रबिम्बं चतुःपञ्चाशद्भागमानत्वात् । अत्रापि विमानाक्रान्त भूमेरगणनादष्टचत्वारिंशद्भागानामकथनेऽपि पूर्वोक्तेन सह न विरोध ॥४८॥ अथ सर्वेषु क्षेत्रेषु दिक्स्वरूपनिर्णयस्वरूप गाथायुगलेनाह—

जस्स जओ आइच्चो, उदेइ सा तस्स होइ पुव्वदिसा ।
जत्थ वि य अत्थमेई, अवरदिसा सा उ नायव्वा ॥ ४९ ॥
दाहिणपासम्मि य दाहिणा उ वामेण उत्तरा होइ ।
एयाओ तावदिसा, सव्वेसिं उत्तरो मेरू ॥ ५० ॥

